श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्वादशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्वादशं दशकम् ॥

## वराहावतारवर्णनं, भूम्युद्धरणवर्णनं च

स्वायम्भुवो मनुरथो जनसर्गशीलो
    दृष्ट्वा महीमसमये सलिले निमग्नाम्।
स्रष्टारमाप शरणं भवदङ्घ्रिसेवा -
    तुष्टाशयं मुनिजनैः सह सत्यलोके ॥ **12.1** ॥

कष्टं प्रजाः सृजति मय्यवनिर्निमग्ना
    स्थानं सरोजभव कल्पय तत्प्रजानाम्।
इत्येवमेष कथितो मनुना स्वयम्भू -
    रम्भोरुहाक्ष तव पादयुगं व्यचिन्तीत् ॥ **12.2** ॥

हा हा विभो जलमहं न्यपिबं पुरस्ता -
    दद्यापि मज्जति मही किमहं करोमि।
इत्थं त्वदङ्घ्रियुगलं शरणं यतोऽस्य
    नासापुटात् समभवः शिशुकोलरूपी ॥ **12.3** ॥

अङ्गुष्ठमात्रवपुरुत्पतितः पुरस्तात्
    भूयोऽथ कुम्भिसदृशः समजृम्भथास्त्वम्।
अभ्रे तथाविधमुदीक्ष्य भवन्तमुच्चै -
    र्विस्मेरतां विधिरगात् सह सूनुभिः स्वैः ॥ **12.4** ॥

कोऽसावचिन्त्यमहिमा किटिरुत्थितो मे
    नासापुटात् किमु भवेदजितस्य माया।

इत्थं विचिन्तयति धातरि शैलमात्रः
सद्यो भवन् किल जगर्जिथ घोरघोरम्॥ **12.5** ॥

तं ते निनादमुपकर्ण्य जनस्तपःस्थाः
सत्यस्थिताश्च मुनयो नुनुवुर्भवन्तम्।
तत्स्तोत्रहर्षुलमनाः परिणद्य भूय -
स्तोयाशयं विपुलमूर्तिरवातरस्त्वम्॥ **12.6** ॥

ऊर्ध्वप्रसारिपरिधूम्रविधूतरोमा
प्रोत्क्षिप्तवालधिरवाङ्मुखघोरघोणः।
तूर्णप्रदीर्णजलदः परिघूर्णदक्ष्णा
स्तोतॄन् मुनीन् शिशिरयन्नवतेरिथ त्वम्॥ **12.7** ॥

अन्तर्जलं तदनुसङ्कुलनक्रचक्रं
भ्राम्यत्तिमिङ्गिलकुलं कलुषोर्मिमालम्।
आविश्य भीषणरवेण रसातलस्था -
नाकम्पयन् वसुमतीमगवेषयस्त्वम्॥ **12.8** ॥

दृष्ट्वाऽथ दैत्यहतकेन रसातलान्ते
संवेशितां झटिति कूटकिटिर्विभो त्वम्।
आपातुकानविगणय्य सुरारिखेटान्
दंष्ट्राङ्कुरेण वसुधामदधाः सलीलम्॥ **12.9** ॥

अभ्युद्धरन्नथ धरां दशनाग्रलग्न -
मुस्ताङ्कुराङ्कित इवाधिकपीवरात्मा।
उद्धूतघोरसलिलाज्जलधेरुदञ्चन्
क्रीडावराहवपुरीश्वर पाहि रोगात्॥ **12.10** ॥

॥ इति श्रीमन्नारायणीये द्वादशं दशकं समाप्तम्॥